# आदर्शप्रश्नपत्रम् (गीताप्रवेशः - मध्यभागः)

1. एकवाक्येन उत्तरन्तु -

    क. द्विगुसमासस्य कानिचन त्रीणि उदाहरणानि लिखन्तु|
    ख. तरप्-तमप्-प्रत्यययोः प्रयोगः कस्यां स्थितौ भवति?
    ग. गीताप्रवेशानुसारं बहुव्रीहेः कति भेदान् पठितवन्तः' के च ते?

2. वैकल्पिकप्रश्नाः

    सामान्यतः क्त-प्रत्ययस्य प्रयोगः भवति-
    क. वर्तमानकालार्थे ख. भूतकालार्थे
    ग. भविष्यत्कालार्थे घ. एतेषु सर्वेषु

3. अधः प्रदत्तेषु समासः विधीयताम्-
    रथिकाश्च अश्वारोहाश्च
    ऊर्णं नाभौ यस्य सः
    छायाबहुलाः वृक्षाः

4. अधःप्रदत्तानां श्लोकांशानां समासस्थलेषु विग्रहवाक्यानि लिख्यन्ताम् -
    क. दुःखेषु अनुद्विग्नमनाः सुखेषु विगतस्पृहः|
    ख. प्रायो गच्छति यत्र भाग्यरहितस्तत्रैव यान्ति आपदः|
    ग. अश्रद्धया हुतं दत्तं तपस्तप्तं कृतं च यत्|

5. "मदर्थम्" अत्र कः समासः? विग्रहवाक्यं च किम्?

6. सति-सप्तमीं प्रयुज्य वाक्यानि निर्मान्तु -
    पुष्पाणि विकसन्ति, भ्रमराः आगच्छन्ति|
    अन्नं प्राप्तम्, भिक्षुकः भोजनं कृतवान्|